


Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 24/05/2014 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 30/05/2014 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | 15/11/2014 | **Ist Proof Reading & Correction** | **Sri Ranganath Gangoor & H K Srinivasa Rao** |
| | | | |

**॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥**

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Acharya Madhwa. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

> ''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-
> ಆಚಾರ್ಯದೇವೋಭವ''

ಸಂಸ್ಕೃತದಲ್ಲಿರುವ ಅನುನಾಸಿಕದ ಸ್ಪಷ್ಟವಾದ ವೈವಿಧ್ಯತೆಯು, ಕನ್ನಡ ಭಾಷೆಯಲ್ಲಿಯೂ ಇರುವಾಗ, ಅದರ ಜ್ಞಾನದ ಗಂಧವೇ ಇಲ್ಲದವರಂತೆ, ಕನ್ನಡಿಗರು ಇದನ್ನು ಕಡೆಗಣಿಸಿರುವುದು ಏಕೋ ತಿಳಿಯದಾಗಿದೆ. ಸರಿಯಾದ ಉಚ್ಚಾರಣೆಗಾಗಿ, ಸರಿಯಾದ ಅನುಸ್ವಾರಗಳು ಅವಶ್ಯಕ. ಆದ್ದರಿಂದ, ಶ್ರಮವಹಿಸಿ, ಸರಿಯಾದ ಅನುನಾಸಿಕ, ಅನುಸ್ವಾರಗಳನ್ನು ಬಳಸಲಾಗಿದೆ. ಓದುಗರು ಇದನ್ನು ಗಮನಿಸಿ ಮನ್ನಿಸಬೇಕಾಗಿ ಪ್ರಾರ್ಥಿಸಲಾಗಿದೆ.

ಗ್ರಂಥ ಋಣ: ವಿಶ್ವ ಮಧ್ವಮಾಹಪರಿಶತ್ ಈ ಸಂಸ್ಥೆಯಿಂದ ಪ್ರಕಾಶಿತವಾದ ಡಾ. ಶ್ರೀ ಕಾಂತೇಶಾಚಾರ್ಯ ಕದರಮಂಡಲಗಿ ಯವರ – ಉಪಾಧಿಖಂಡನ

TableofContents


॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥ ........ 2

ಕೃತಜ್ಞತೆಗಳು ........ 2

॥ मायावादखण्डनम् ॥ ........ 4

मङ्गलाचरणम् ........ 4

शास्त्रस्य सिद्धान्ताभिमतविषयादिनिरूपणम् ........ 4

मायावाद्यभिमतविषयादिनिरूपणम् ........ 4

ग्रन्थस्य सङ्गतिप्रदर्शनम् ........ 4

विमतशब्दप्रयोगप्रयोजनम् ........ 5

सम्प्रतिपन्नपदप्रयोगप्रयोजनम् ........ 5

अरम्भणीयत्वपदार्तविवरणम् ........ 5

मूलस्य तर्कपरतासूचनाय'स्यात्'इति पदाद्याहारः ........ 5

'अन्यथाप्रतिपादकत्वात्' इत्यस्य वैयर्थ्यशङ्कानिरासः ........ 6

मायावादस्य अनारम्भणीयत्वसाधनम् ........ 6

पूर्वोक्ततर्के आपादकविवरणम् ........ 6

ब्रह्मात्मैक्यस्य शास्त्रार्थत्वे शास्त्रस्यायथार्थप्रतिपादकत्वसमर्थनम् ........ 6

ब्रह्मात्मैक्यस्य स्वरूपातिरेके सत्यत्वे च अद्वैतहानिदोषः ........ 6

ब्रह्मात्मैक्यस्य स्वरूपानतिरेके स्वमतरीत्या सिद्धसाधनतादोषः ........ 7

पररीत्या शास्त्रस्यैक्याप्रतिपादकत्वसाधनम् ........ 7

आत्मस्वरूपसिद्धावप्यद्वैतासिद्धिशङ्कापरिहारौ ........ 7

अज्ञाननिवृत्तावद्वैतस्य स्वतः सिद्धिरिति शङ्का तत्परिहारश्च ........ 8

शास्त्रस्य सिद्धसाधनत्वे अनुपादेयत्वाप्रामाण्यदोषौ ........ 8

अद्वैतवादे तन्न्यायेन विषयाभावसमर्थनम् ........ 8

धर्मात्मैक्यस्य मिथ्यात्वे भेदसत्यतासिद्धिदोषः ........ 9

पूर्वोत्तरग्रन्थयोः पौनरुक्त्यशङ्का तत्परिहारश्च ........ 9

अद्वैतवादे प्रयोजननिरासः ........ 9

ज्ञात आत्मैवाज्ञानहानिरिति पक्षनिरासः। ........ 10

अज्ञानहानेः पञ्चमप्रकारतापक्षनिरासः ........ 10

अज्ञाननिवृत्तेरज्ञानकार्यत्वनिरासः ........ 11

मायावादे अधिकार्यभावविवरणम्। ........ 11

मायावादे सम्बन्धाभावोपपादनम् ........ 11

श्रुतिस्मृतिभ्यां विष्णोः सर्वोत्तमत्वस्यैव सर्वशास्त्रार्थत्वसमर्थनम् ........ 11

# ॥ मायावादखण्डनम् ॥

## मङ्गलाचरणम्

नरसिंहमसह्योरुप्रत्यूहतिमिरापहम्।

प्रणिपत्य व्याकरिष्ये मायावादस्य खण्डनम्॥

## शास्त्रस्य सिद्धान्ताभिमतविषयादिनिरूपणम्

इह हि विविधसांसारिकदुःखदर्शनेन विरक्तस्य शमदमादिमतो मुमुक्षोरधिकारिणस्तन्निवृत्यै परमानन्दावाप्त्यै च सकलजीवजडात्मकात् प्रपञ्चात् परमार्थत एवात्यन्तभिन्नं निखिलगुणोदारं निरस्तसमस्तदोषं परब्रह्म प्रतिपादयितुं सकलश्रुतिस्मृतीनां तदुपकरणभूतब्रह्ममीमांसायाश्च प्रवृत्तिरिति तत्त्वम्॥

## मायावाद्यभिमतविषयादिनिरूपणम्

अपरे तु 'स्वतः परब्रह्मभूतस्यैव जीवस्य अज्ञाननिमित्तं दुःखादि। तदद्वैतज्ञाननिवर्तनीयमित्यतोऽनर्थहेतोरस्य प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वशास्त्रारम्भः' इति वर्णयन्ति

## ग्रन्थस्य सङ्गतिप्रदर्शनम्

तन्मतमपाकृत्य स्वमतं समर्थयितुमिदं प्रकरणमारभमाणो भगवानाचार्यः परममङ्गळं नरसिंहस्तवनमादावाचरति—

**नरसिंहोऽखिलाज्ञानमतध्वान्तदिवाकरः।जयत्यमितसज्ज्ञानसुखशक्तिपयोनिधिः ॥**

अखिलं चैतन्यमात्रातिरिक्तं अज्ञानकल्पितमिति यन्मतं तदेव ध्वान्तमिव। सम्यग्ज्ञानप्रतिरूपत्वात्। तन्निरसने दिवाकर इव।

जयति उत्कृष्टो वर्तते। तथा चोक्तं-

जयेर्जयाभिभवयोराद्येऽर्थेऽसावकर्मकः।उत्कर्षप्राप्तिराद्योऽर्थो द्वितीयेऽर्थे सकर्मकः॥ इति

सत्वं ज्ञानसुखशक्तीनां विशेषणम्। ज्ञानस्य यथार्थत्वं सत्वं, सुखस्य दुःखासम्भिन्नत्वं, शक्तेरप्रतिबद्धता। ताभिः पयोनिधिरिव। पयोनिधिः परिमितो भवतीत्यतस्तममितत्वेन विशिनष्टि।

द्विविधः खलु पुरुषार्थोऽनिष्टनिवृत्तिरिष्टप्राप्तिश्च। तत्र अखिलेति मायावादादिदुर्मतप्रसञ्जित-मिथ्याज्ञानाद्यानिष्टनिवर्तकत्वेन नरसिंहस्तुतिर्विहिता। अमितेति सम्यग्ज्ञानादिसमस्तेष्टसम्पादन-समर्थत्वेनेति॥

अखिलाज्ञानमतं ध्वान्तसममित्येतदसहमान आह जीवब्रह्मणोरेकत्वं हि श्रुतितन्मीमांसा-भिस्तात्पर्यतः प्रतिपाद्यते। न चैतच्चैतन्यातिरिक्तस्याखिलस्य अज्ञानकल्पिततया विनोपपद्यते। तत् कथमेवमुच्यते? इति।

मैवम्। स्यादेतदेवं, यदि जीवब्रह्मणोरैक्य प्रतिपादकत्वं वेदतन्मीमांसयोरुपपन्नं स्यात्। न चैतदस्ति। तत्परतया व्याख्याने वेदादेरनारम्भणीयत्वप्रसङ्गात्। तत्कथमिति। तत्राह —

विमतमनारम्भणीयम्, अन्यथाप्रतिपादकत्वात्, यदित्थं तत् तथा, यथा सम्प्रतिपन्नम्।

## विमतशब्दप्रयोगप्रयोजनम्

विमतं आरम्भणीयत्वानारम्भणीयत्वाभ्यां विमतिविषयीभूतं श्रुतितन्मीमांसाशास्त्रम्। 'शास्त्रमनारम्भणीयं' इत्येवोक्ते बौद्धादिशास्त्राणां अनारम्भणीयत्वस्य परेणाभ्युपगतत्वात् इष्टापादनमेतत् स्यात्। तर्हि वेदादित्येवोच्यताम्। मैवम्। विमतिग्रहणेन निराश्रयत्वादि-दोषपरिहारस्यापि सूचितत्वात्।

## सम्प्रतिपन्नपदप्रयोगप्रयोजनम्

एवमापाद्यवैकल्यादिदोषपरिहारसूचनाय 'यथा सम्प्रतिपन्नम्' इत्युक्तम्। अन्यथा बौद्धादिशास्त्रम् इति ब्रूयात्॥

## अरम्भणीयत्वपदार्तविवरणम्

नन्वनारम्भणीयत्वं नाम अप्रणेतव्यत्वं वा? अश्रोतव्यत्वादिकं वा? आद्ये त्विष्टापादनम्। वेदस्याप्रणेतव्यत्वात्। न द्वितीयः। बौद्धादिशास्त्रश्रवणस्यापि दर्शनात्। मैवम्। प्रेक्षावदुपादेयत्वाभावस्य विवक्षितत्वात्।

## मूलस्य तर्कपरतासूचनाय'स्यात्'इति पदाद्याहारः

स्यादिति प्रतिज्ञावाक्यशेषः। तथा च 'यदि वेदादिकं जीवब्रह्मणोरैक्यप्रतिपादकं स्यात् तदा अनारम्भणीयं प्रसज्येत' इत्युक्तं भवति।

## ‘अन्यथाप्रतिपादकत्वात्’ इत्यस्य वैयर्थ्यशङ्कानिरासः

आपादकमेव अयथार्थप्रतिपादकत्वादित्यनेन हेतुवाक्येन विव्रियत इत्यदोषः। तच्चोत्तरत्र। प्रदर्शयिष्यामः।

## मायावादस्य अनारम्भणीयत्वसाधनम्

अथवा वेदतन्मीमांसादिकमैक्यपरतया व्याकुर्वन्मायावादिप्रणीतं शास्त्रमेव पक्षीकृत्य तस्यानारम्भणीयत्वं वेदादेस्तत्परत्वनिरासाय साध्यते।

कथमन्यथाप्रतिपादकत्वं विमतस्य शास्त्रस्येत्यत आह—

**न हि ब्रह्मात्मैक्यस्य याथार्थ्यं तत्पक्षे।**

अन्यथाप्रतिपादकत्वं ह्ययथार्थप्रतिपादकत्वम्। ब्रह्मात्मनोरेकत्वं च शास्त्रविषयतया परस्याभिमतम्। न तत् परमार्थभूतम्। अतोऽन्यथाप्रतिपादकत्वं सिद्धम्।

## पूर्वोक्ततर्के आपादकविवरणम्

ननु ‘यद्यद्वैतपरं शास्त्रं स्यात् तदा अनारम्भणीयं प्रसज्येत’ इति प्रसङ्गोक्तौ आपादकस्योक्तत्वात् पुनर्हेत्वभिधानं व्यर्थं स्यात्। न चैतदेव आपादकाभिधानमिति वाच्यम्। तथा सत्यन्यथाप्रतिपादकत्वादित्यस्य ब्रह्मात्मैक्यप्रतिपादकत्वादित्यर्थः स्यात्। तथा च दृष्टान्तानुपपत्तिः। न हि ब्रह्मात्मैक्यस्येत्युपपादनानुपयोगोऽसङ्गतत्वं चेति।

मैवम्। अभिप्रायसद्भावात्। तथा हि ‘यद्यद्वैतमेव शास्त्रार्थः स्यात् तदा शास्त्रमनारम्भणीयं स्यात्’ इत्युक्ते निमित्तनैमित्तिकभावस्य अस्फुटत्वात्, कथमित्याकाङ्क्षायां अन्यथाप्रतिपादकत्वात् इत्युक्तम्। ‘यदिशास्त्रार्थोऽद्वैतं स्यात् तदा शास्त्रमन्यथाप्रतिपादकं स्यात्। ततश्च अनारम्भणीयं प्रसज्येत’ इति।

## ब्रह्मात्मैक्यस्य शास्त्रार्थत्वे शास्त्रस्यायथार्थप्रतिपादकत्वसमर्थनम्

अद्वैतस्यैव शास्त्रार्थत्वे शास्त्रस्य अयथार्थः प्रतिपादकत्वं कथं? इत्यतो ‘न हि ब्रह्मात्मैक्यस्य’ इत्यभिहितम्। तत्रोपपत्तिः ‘तत्पक्षे’ इति। ऐक्यमेव शास्त्रार्थश्चेद् ब्रह्मातिरिक्तं सर्वमपरमार्थभूतं स्यात्। ऐक्यं च ब्रह्मव्यतिरिक्तत्वात् अपरमार्थभूतम्। तत्प्रतिपादकं च शास्त्रं कथं अन्यथाप्रतिपादकं न भवेदिति।

## ब्रह्मात्मैक्यस्य स्वरूपातिरेके सत्यत्वे च अद्वैतहानिदोषः

अथ ब्रह्मात्मैक्यं तत्स्वरूपातिरिक्तमपि परमार्थसदङ्गीक्रियते तदा तेनैव द्वैतापत्तेरद्वैतपरं शास्त्रमित्यस्य हानिः स्यादित्याह—

अद्वैतहानेः स्वरूपातिरेके।

ब्रह्मात्मैक्यस्येति वर्तते। याथार्थ्ये सतीति शेषः।

**ब्रह्मात्मैक्यस्य स्वरूपानतिरेके स्वमतरीत्या सिद्धसाधनतादोषः**

स्यादेतत्, ऐक्यं परमार्थसदेव। किन्तु ब्रह्मस्वरूपानतिरिक्तमेव। यथाह—"'तच्चाद्वैतं' 'ब्रह्मैवेदं सर्वं' इति श्रुत्यर्थेन सहैक्यमापन्नं हि ब्रह्मैव स्यात्"' इति। तथा च कथं तत्प्रतिपादकं शास्त्रमयथार्थप्रतिपादकं स्यादित्यत आह —

अनतिरेके स्वप्रकाशत्वादात्मनः सिद्धसाधनता।

शास्त्रस्येति शेषः। यद्यद्वैतं ब्रह्मस्वरूपानतिरिक्तं स्यात् तदा शास्त्रस्य सिद्धार्थबोधकत्वं प्रसज्येत। बोध्यस्यात्मनो ब्रह्मस्वरूपत्वात्। तस्य च स्वप्रकाशत्वेन नित्यसिद्धत्वात्। अतः सिद्धसाधनतापरिहाराय ऐक्यस्य स्वरूपातिरेकेऽङ्गीक्रियमाणे अन्यथाप्रतिपादकत्वमेवेति।

अयं च दोषः स्वमतरीत्यैवोक्त इति मन्तव्यम्। स्वविषयप्रकाशत्वं स्वप्रकाशत्वं' इति स्वमतेऽङ्गीकारात्।

**पररीत्या शास्त्रस्यैक्याप्रतिपादकत्वसाधनम्**

पररीत्या तु स्वप्रकाशत्वादात्मनः शास्त्रस्याप्रतिपादकत्वं स्यात्। 'अवेद्यत्वं स्वप्रकाशत्वं' इत्यङ्गीकारादिति दूषणं द्रष्टव्यम्।

**आत्मस्वरूपसिद्धावप्यद्वैतासिद्धिशङ्कापरिहारौ**

ननु स्वप्रकाशतया आत्मस्वरूपस्य सिद्धत्वेऽप्यद्वैतादिविशेषाकारेणानधिगतत्वान्न शास्त्रस्य सिद्धसाधनत्वादिकम्। यथा खलु भवतां गुणगुणिनोरभेदेऽपि गुणिनः स्पर्शनेनोपलम्भे रूपस्याऽनधिगतिरेवमिति। अत आह —

निर्विशेषत्वादात्मनो नानधिगतो विशेषः।

स्यादेवं, घटोपलम्भेऽपि तद्रूपानुपलब्धिः। यतो रूपं घटाभिन्नमपि तद्विशेषतया अङ्गीक्रियते, न तु तन्मात्रम्। न चैक्यमपि आत्माभिन्नं तद्विशेषः। येन आत्मनि सिद्धेऽप्यनधिगतमिति युक्तम्। आत्मस्वरूपस्य निर्विशेषत्वाङ्गीकारादिति।

### अज्ञाननिवृत्तावद्वैतस्य स्वतः सिद्धिरिति शङ्का तत्परिहारश्च

अथापि स्यात्। भवेदिदं शास्त्रस्य सिद्धसाधनत्वादि यदि शास्त्रं साक्षादद्वैतं प्रतिपादयतीति ब्रूमः। न चैवम्। किं नाम? आवरणभूताज्ञानमात्रं निवर्तयतीति। निवृत्ते त्वावरणे अद्वैतं स्वत एव सिद्धम्। तदुक्तं – 'सिद्धं तु निवर्तकत्वात्' इति तत्राह —

सिद्धत्वात् स्वरूपस्य विशेषाभावाच्च नाज्ञानं कस्यचिदावरकम्।

स्यादेवं शास्त्रस्य सिद्धसाधनतापरिहारः। यदि परमते अज्ञानमावरणं सम्भवेत्। न चैतत्सम्भवति। आवरणं ह्याव्रियमाणेन व्याप्तम्। न चाज्ञानस्य तदस्ति। तथा हि— किमज्ञानमात्मस्वरूपस्यावरणं स्यात्? उत तद्विशेषस्य? नाद्यः। तस्य स्वप्रकाशत्वेन नित्यसिद्धत्वात्। न द्वितीयः। तदभावात्। तथा च व्यापकाभावाद्व्याप्यमावरणमपि न सम्भवतीति न तन्निवर्तकत्वेन शास्त्रस्यासिद्धसाधनत्वं भवतीति।

यदि शास्त्रं साक्षादद्वैतं प्रतिपादयतीति ब्रूमः। न चैवम्। किन्नाम? आवरणभूताज्ञानमात्रं निवर्तयतीति।

### शास्त्रस्य सिद्धसाधनत्वे अनुपादेयत्वाप्रामाण्यदोषौ

अस्तु तर्हि सिद्धसाधनता शास्त्रस्य। को दोषः? इति चेत्। परार्थत्वाच्छास्त्रस्य परसिद्धबोधने अनुपादेयत्वं स्यादित्येकः। अपरं चाह -

अनधिगतार्थगन्तृप्रमाणमिति च तन्मतम्।

गन्तृशब्देनावगतिसाधनमुच्यते। अनधिगतेति स्मृत्यादिव्युदासार्थम्। शुक्तिरजतादिज्ञान-निरासायार्थग्रहणम्। अर्थस्य च यथावस्थितस्य विवक्षितत्वात्। अर्थस्य फलस्य च निवृत्यर्थं गन्तृपदम्। तस्य च साधनपरत्वान्न कर्तर्येति प्रसङ्गः। एतद्भाट्टानां प्रमाणलक्षणम्। 'व्यवहारे भट्टनयः' इति मायावादिभिरङ्गीकारात् नतन्मतमितियुक्तम्। यदि शास्त्रमधिगतमेवार्थमवगमयेत्तदा प्रमाणलक्षणाभावादप्रमाणं प्रसज्येतेति।

### अद्वैतवादे तन्न्यायेन विषयाभावसमर्थनम्

एवमयथार्थपरत्वमन्यथाप्रतिपादकत्वमित्यभिप्रेत्योपपादितम्। अधुना विषयप्रयोजनादिरहितत्व-मन्यथाप्रतिपादकत्वमभिप्रेत्य तत्सिद्ध्यर्थं पराबिमतं शास्त्रस्य विषयादिकं परन्यायेनापाकरोति —

अज्ञाना सम्भवादेव तन्मतमखिलमपाकृतम्।

| |
|---|
| तन्मतं तदभिमतं अखिलं विषयादिकमपाकृतम् वेदितव्यम्। कथम्? उक्तप्रकारेण तन्मते अज्ञानासम्भवाद्विषयादेश्चाज्ञानसापेक्षत्वात्। अज्ञातो हि विषयो भवति। अन्यथा अतिप्रसङ्गादिति। |
| एवमज्ञानासम्भवेन विषयं निराकृत्य प्रकारान्तरेण निराचष्टे— |
| मिथ्यात्वे चैक्यस्यातत्त्वावेदकत्वमागमस्य स्यात्। |
| ऐक्यं हि शास्त्रस्य विषयतया परस्याभिमतम्। तत्किमात्मस्वरूपातिरिक्तं? उत तन्मात्रं? आद्येऽपि सत्यं मित्या वा? नाद्यः। अद्वैतहानिप्रसङ्गात्। न द्वितीयः। ऐक्यस्य मिथ्यात्वे तत्प्रतिपादकस्य शास्त्रस्यात्तत्वावेदकत्वं स्यात्। तथा चापसिद्धान्तः स्यात्। |
| **धर्मात्मैक्यस्य मिथ्यात्वे भेदसत्यतासिद्धिदोषः** |
| किञ्च - |
| सत्यता च भेदस्य। |
| परस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरविधिना व्याप्तत्वादैक्यस्य मिथ्यात्वे भेदस्य सत्यता च स्यात्। अत ऐक्यमात्मस्वरूपमेवेत्यङ्गीकार्यम्। स्वरूपस्य च स्वप्रकाशत्वे न विषयता सम्भवतीति। |
| **पूर्वोत्तरग्रन्थयोः पौनरुक्त्यशङ्का तत्परिहारश्च** |
| पूर्वमनतिरेकपक्षप्रतिषेधेनातिरेकपक्षमङ्गीकार्ययथार्थप्रतिपादकत्वं समर्थितम्। इदानीं तु तद्विपर्ययेण विषयत्वाभावप्रतिपादनमिति भेदः। |
| **अद्वैतवादे प्रयोजननिरासः** |
| एवं विषयं निराकृत्य प्रयोजनं निराकरोति— |
| एवमेव प्रयोजनमपि निरस्तम्। |
| यथा अज्ञानासम्भवादज्ञातस्य विषयस्यासम्भवोऽद्वैतवादे, एवमेवाज्ञानासम्भवादेव शास्त्रस्य प्रयोजनमपि निरस्तं वेदितव्यम्। मोक्षो हि प्रयोजनम्। स चाज्ञाननिवृत्तिरूपः। यदाह— 'अविद्यास्तमयो मोक्षः सा संसार उदाहृतः' इति न चाज्ञानासम्भवे तन्निवृत्तिरुपपद्यते। |
| नन्वेतत् 'अज्ञानासम्भवादेव' इत्यनेनैव वाक्येन सिद्धम्। तत्किमर्थोऽयं ग्रन्थः? सत्यम्, तथापि तस्यैव प्रपञ्चोऽयमित्यदोषः। प्रपञ्चनम् च प्रकारान्तरेण प्रयोजननिरासप्रस्तावायेति। |
| प्रकारान्तरेण प्रयोजनं निराकरोति— |

प्रयोजनं निरस्तमिति सम्बन्धः। अज्ञाननिवृत्तिलक्षणो हि मोक्षः परेणात्मस्वरूपतयैवेष्टः। यथाऽऽह 'आत्मैवाज्ञानहानिः' इति। आत्मस्वरूपं च प्रागेव शास्त्रप्रवृत्तेः सिद्धमेवेति कथं तत् प्रयेजनं स्यात्? न हि कश्चित्सिद्धस्य साधनाय यतते। नापि तत् साधनार्हम्।

स्वरूपत्वान्मोक्षस्य पूर्वमेव सिद्धत्वात्।

## ज्ञात आत्मैवाज्ञानहानिरिति पक्षनिरासः।

'ज्ञात आत्मैवाज्ञानहानिर्नात्ममात्रम्' इति कश्चित्। तदसत्। आत्मनो ज्ञानकर्मतानङ्गीकारात्। वृत्तिविषयताऽस्तीति चेत्। तथापि वृत्तिविशिष्ट आत्मा मोक्ष इत्युक्तं स्यात्। तथा च वृत्तेर्निवृत्तौ मोक्षनिवृत्तिप्रसङ्गः। वृत्युपलक्षित आत्मा मोक्ष इति चेत्, तथापि जीवन्मुक्तौ प्रसङ्ग इत्येषा दिक्।

## अज्ञानहानेः पञ्चमप्रकारतापक्षनिरासः

अपर आह— नाविद्यास्तमयलक्षणं मोक्षमात्मस्वरूपमाचक्ष्महे। किं नाम? अन्यमेव। न च वाच्यं तस्य सत्वे अद्वैतहानिः, असत्वे तद्भावः, सदसत्वं विरुद्धं, सदसद्विलक्षणत्वेऽज्ञाननिवृत्तित्वा-नुपपत्तिः, प्रतियोगितन्निवृत्त्योर्वैलक्षण्यस्यावश्यकत्वादिति। पञ्चमप्रकारताभ्युपगमात्। यथोक्तं —

न सन्नासन्नसदसन्नानिर्वाच्यश्च तत्क्षयः।

यक्षानुरूपो बलिरित्याचार्यः प्रत्यपीपदम्॥ इति॥

तत्राह -

अज्ञानसम्भवेन चतुर्थप्रकाराभावात् पञ्चमप्रकारताऽपि निरस्ता।

मोक्षस्येत्यनुवर्तते। अज्ञानस्य हि न सत्वमद्वैतभङ्गात्। नाप्यसत्वं प्रतीतिविरोधात्। न च सदसत्वं विरोधात्। अतश्चतुर्थप्रकारोऽनिवर्चनीयत्वमङ्गीकार्यम्। न च तन्निवृत्तिरपि तादृशी सम्भवतीत्येवं मोक्षस्य पञ्चमप्रकारता परेणाङ्गीकृता।

स्यादिदं यद्यज्ञानमेव परमते स्यात्। न च तत्सम्भवति। 'सिद्धत्वात्स्वरूपस्य' इत्यादिन तदसम्भवस्योक्तत्वात्। अतोऽज्ञानासम्भवेन चतुर्थप्रकारस्य सुतरामभावात् तेन कल्प्यमाना मोक्षस्य पञ्चमप्रकारताऽपि पूर्वोक्तरीत्यैव निरस्ता।

अथवा, अज्ञाननिवृत्तिर्यद्यात्मातिरिक्ता पञ्चम प्रकारोररीक्रियते तदा वक्तव्यं किमज्ञानकार्यम्? न वा ? इति न तावद्द्वितीयः। अत्मातिरिक्तस्याज्ञानतत्कार्ययोरन्यतरत्वावश्यम्भवाभ्युपगमात्।

## अज्ञाननिवृत्तेरज्ञानकार्यत्वनिरासः

आद्ये बाधकमाह— अज्ञानासम्भवेनेति॥ यद्यज्ञाननिवृत्तिरज्ञानकार्या तता अज्ञानस्य तदानीमवस्थानं स्यात्। न ह्युपादानेन विनोपादेयस्य स्थितिरस्ति। अज्ञाननिवृत्तावज्ञानासम्भवात्। तथा चाज्ञाननिवृत्तेरुभयथाऽप्यसम्भवेन स्वरूपमेव नास्ति। पञ्चमप्रकारता तु दूरनिरस्तेति।

किञ्च घटादीनां सत्वं, शशविषाणादीनामसत्वं, घटादीनामेव देशकालादिव्यवस्थया सदसत्वमिति प्रकारत्रयस्यैवानुभवात् चतुर्थप्रकार एव नास्ति। तदभावात् पञ्चमप्रकारता तु मोक्षस्याष्टमरस इवात्यन्तासम्भाविनीत्याह— चतुर्थप्रकारेति॥

## मायावादे अधिकार्यभावविवरणम्।

आज्ञानासम्भवादधिकारी च निरस्त इत्युक्तम्। तद्विवरणार्थमाह—

**विषयप्रयोजनाभावादेवाधिकारी च।**

निरस्त इति सम्बन्धः। यो हि यत्प्रयोजनमर्थयमानो यं विषयं जिज्ञासते स एव तत्राधिकारी भवति। प्रकृते चाज्ञानासम्भवेन विषयप्रयोजने निराकृते इति तदभावादेव तदविनाभूतोऽधिकारी च निरस्तो वेदितव्यः।

## मायावादे सम्बन्धाभावोपपादनम्

अज्ञानासम्भवात् सम्बन्धाभावः उक्तः। तमुपपादयति—

**तदभावदेव सम्बन्धोऽपि ॥**

सतामेव हि सम्बन्धो भवति। अज्ञानासम्भवेन विषयाद्यभावश्चोपपादितः। अतो विषयाद्यभावात् सम्बन्धोऽपि निरस्त एवेति।

## श्रुतिस्मृतिभ्यां विष्णोः सर्वोत्तमत्वस्यैव सर्वशास्त्रार्थत्वसमर्थनम्

एवं वेदादेर्जीवब्रह्मणोरेकत्वप्रतिपादकत्वे अनारम्भणीयत्वप्रसङ्गान्न तत्प्रतिपादकत्वमित्युक्तम्। इदानीं परमाप्ततमेन भगवता श्रुत्या च विष्णोः सर्वोत्तमत्वस्यैव सर्वशास्त्रप्रतिपाद्यतया अभिहितत्वाच्च तदेव वेदादिप्रतिपाद्यं नात्मब्रह्मैक्यमित्याह—

**'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**

'इमौ' इति प्रमाणसिद्धतां सूचयति। पुरुषौ चेतनौ। एवशब्दस्य द्वावेवेति सम्बन्धः। तद्घटनाय परमपुरुषं व्यावर्तयितुं 'लोक' इत्युक्तम्।

क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

तदनेनोत्तमपुरुषनिरूपणस्यापेक्षितं पुरुषनिरूपणं कृतम्।

ततः किमित्यत आह—

उत्तमः पुरुषस्त्वन्यः..

अन्यः क्षराक्षराभ्याम्। न त्वनयोरेवैकः पुरुषोत्तमः कल्प्यत इति भावः।

अन्यस्योत्तमपुरुषत्वे श्रुत्यादिसम्मतिमाह—

..परमात्मेत्युदाहृतः।

आत्मशब्दोऽत्र चेतनपर्यायः।

युक्तिं चाह—

यो लोकत्रयमाविश्य बिभर्ति..

यो हि यस्य भर्ता स तस्मादुत्तमो युक्तः।

आविष्टस्य तन्नाशे नाशप्रसङ्ग इत्यत आह—

..अव्यय..

तत् कथम्? ऐश्वर्यादित्याह

..ईश्वरः ॥

स च कः? इत्यतोऽहमेवेति सप्रमाणकमाह—

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।

अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

क्षरं चातीत इति चशब्दान्वयः। लोकशब्देन पौरुषेयागम उच्यते।

तात्पर्यद्योतनाय वेत्तुः फलमाह —

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्।

स सर्वविद्भजति मां सर्वभावेन भारत ॥

एवमित्यस्य व्यावृत्तिनिरास इति॥ एवमित्यस्य व्यावृत्तिनिरासः असम्मूढ इति। न पुनरश्वकर्णादिवत् संज्ञामात्रत्वेनेत्यर्थः। स सस्ववित्, अस्यैव सर्वशास्त्रार्थत्वात्। सर्वभावेन सर्वप्रकारेण।

एतच्च न यस्मैकस्मैवाच्यमित्याह—

इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ।

स सर्वविदित्यात्युक्तम्।

तत् किम् ? इत्यत आह —

एतद्बुध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ' ॥

बुद्धिमान् अपरोक्षज्ञानी। कृतकृत्यो मुक्तः।

'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।

मनसस्तु परा बुद्धिर्बुद्धेरात्म महान् परः ॥

महतः परमव्यक्तमव्यक्तात् पुरुषः परः।

पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ' ॥

आत्मा महानिति सामानाधिकरण्यम्। न परं किञ्चित्। किन्तु? सा काष्ठा स एवावधिः। कुत एतत्? सा परा गतिः, गम्यत इति गतिः।

एवं सर्वशास्त्रैः प्रतिपाद्यत इत्याह—

'भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति'।

सर्वगुणेषु भूमगुणस्य ज्यायस्त्वं मुख्यतो वेदप्रतिपाद्यत्वमिति सूत्रार्थोऽत्राभिमतः।

इति विष्णोः सर्वोत्तमत्वमेव शास्त्रार्थत्वेन भगवता श्रुत्या चाभिहितम्॥

एवं प्रकरणार्थमुपपाद्य तस्य प्रयोजनमाह —

इति विष्णोः सर्वोत्तमत्वमेव सर्वशास्त्रार्थत्वेन भगवता श्रुत्या चाभिहितम् ॥

इति सर्वज्ञमुनिना मायावादतमोऽखिलम्। निरस्तं तत्त्ववादेन सतां संशयनुत्तये ॥

अन्यथा हि विप्रतिपत्तेः संशयो भवति।

प्रकरणार्थमुपसंहरन् तदनुगुणं भगवद्वाक्यमेव पठति—

नास्ति नारायणसमं न भूतं न भविष्यति। एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम् ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं मायावादखण्डनम्॥

वचनप्रसूनमाला जयतीर्थाख्येन भिक्षुणा रचिता।

ध्रियतां सदयो हृदये कमलामहिलेन पुरुषेण॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचित—मायावादखण्डन विवरणं

जयतीर्थभिक्षुविरचितं सम्पूर्णम्

॥ श्री कृष्णार्पणमस्तु ॥

॥ मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥

॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम् ॥